संस्कृत-भवितव्यम्

● निरन्तरं पञ्चषष्टिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् ●

संस्कृत-भाषा-प्रचारि-सभायाः मुखपत्रम्

अङ्क-मूल्यम् रु. ५/- वा. शु. : रु. २५०/-	PRINTED MATTER	वृत्तपत्र-पञ्जीयन-संख्या RN 11454/57
Core Banking Facility : **Name :** Sanskrit Bhasha Pracharini Sabha **A/c No. :** 30362855441 **IFSC/CIF Code :** SBIN0004872	डाकप्रेषण पञ्जीयनसंख्या NGP-27 Postage Licence No. 9 संपादिका **डॉ. लीना रस्तोगी**	सहसंपादिकाद्वयम् **डॉ. वीणा गानु, डॉ. शारदा गाडगे**

संस्थापक-संपादकः
स्व. डॉ. श्री. भा. वर्णेकर

वर्षम् ६५, अङ्कौ ४२, ४३
शनि. दि. २, ९ जानेवारी २०१६, मार्गशीर्ष कृ. ८, १४ शके १९३७, युगाब्द ५११७

ISBN 978-0-00-000978-4 18900
9 780000 009784
13 Digit ISBN : 978-1-890041-04-5
Barcode ISBN : 978-0-00-000978-4:18900

प्रबन्धिका
डॉ. प्रज्ञा देशपाण्डे
prabandhika.sanskbhavitavyam@gmail.com

प्रकाशकः
डॉ. चन्द्रगुप्त वर्णेकर
०९३७०८०३९१३
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिमः उच्च-न्यायालय-मार्गः, नागपुरम् - ४४० ००१.

www.sanskritbps.org

सुसंस्कृत-पत्रकारिताविषये कार्यशाला

अङ्कविशेषः

वार्ताः

■ **संस्कृत-पत्रकारिताकार्यशालायां सर्वेषां हार्दं स्वागतम्!**

समाजे, देशविदेशेषु च याः वैशिष्ट्यपूर्णाः सामाजिकाः, धार्मिकाः, सांस्कृतिकाः, राष्ट्रियाः, राजकीयाः, शैक्षणिकाः, आर्थिकाः, स्वास्थ्यादि-विषयकाः वदान्याः व्यवहाराः, सभाः, घटनाः वा अनुभूयन्ते, तासां यथार्थसङ्कलनैः सोदन्त-विश्लेषितं विवरणं, सम्बन्धितानां साक्षात्कारेण सहैव यथाशीघ्रं ध्वनि-लेख-छायाङ्कनैः सह संस्कृतभाषया विशिष्टशैल्यां साभिप्रायं दृक्-श्राव्य-मुद्रितमाध्यमैः प्रसारणं यः आत्मनिष्ठ-भावनया करोति सः संस्कृतपत्रकारो भवति। तादृशीं पत्रकारवृत्तिं स्वीकर्तुं समुत्सुकानां सर्वेषां विशेषतः संस्कृतस्नातकच्छात्राणाम् एकदिवसीयायां कार्यशालायां स्वागतम्! अस्यां कार्यशालायां न केवलं संस्कृतभाषायां नियतकालिक-प्रकाशनविषये मार्गदर्शनं भविष्यति अपि तु अन्यासां (हिन्दी/मराठी आङ्ग्लादिषु भाषास्वपि) पत्रकारिताविषये समुपयुक्तं चिन्तनं भविष्यति। सम्प्रति पत्रकारितायाः क्षेत्रे या असंस्कृतता, अशुचिता वा अनुभूयते तां परित्यज्य, निरर्थकान् वादविषयांश्च निराकृत्य समुचितभाषया वृत्तप्रसारणं कथं करणीयमिति मार्गदर्शनमत्र भविता। जनतन्त्र-प्रशासने चतुर्थस्तम्भ इव तिष्ठतः वृत्तपत्रस्य राष्ट्रकार्ये महत्त्वमपि तत्र स्फुटी-भविष्यति। दृक्-श्राव्य-मुद्रित-वृत्तमाध्यमेषु यानि नवनवीनानि विज्ञानतन्त्रोपकरणानि उपयुज्यन्ते तेषां सप्रयोगं प्रदर्शनमपि अपेक्ष्यते। नियतकालिकस्य गुणवत्ता पत्रकारैः, सम्पादकमण्डलेन एव निर्धार्यते, अतः सोऽपि परिसंवादविषयः भविष्यति। पत्रकारितायां सजवं सुविरचितं सत्यं साहित्यं खलु इतिहासस्य पूर्वलेखनं भवेदिति मनसि निधाय कार्यशालायाः कृते शुभाशंसनम्!

■ **सुसम्पन्नं 'संयोगी'-शिबिरम्! -** नागपुरे रेशीमबागपरिसरे ३ जानेवारी दिनाङ्के श्री. **दिनेशकामत**वर्यैः समुद्घाटिते शिबिरेऽस्मिन् संस्कृतसम्भाषणम्, योगाभ्यासः, गीताप्रवचनानि सदृशाः उपक्रमाः सोत्साहं सञ्जाताः। दिनद्वयं यावत् पूज्यानां **स्वामिगोविन्दगिरि**वर्याणां श्रीमद्भगवद्गीताविषये समुद्बोधनमिति शिबिरस्यास्य वैशिष्ट्यम्। आदौ २ जानेवारी दिनाङ्के संस्कृतभारत्या कार्यकर्तृवर्गस्य उद्घाटनं, **स्व. काव्यतीर्थ जयराम पल्लेवार**वर्यस्य 'भारतमञ्जरी' शतक-काव्यचतुष्टयस्य विमोचनं च महाराष्ट्रस्य मुख्यमन्त्रिणा **देवेन्द्रफडणवीस**वर्येण कृतम्। प्रसङ्गेऽस्मिन् पुस्तकस्यास्य सम्पादनाय **डॉ. मधुसूदन पेन्ना, डॉ. लीना रस्तोगी, डॉ. चन्द्रगुप्तवर्णेकर**श्च मुख्यमन्त्रिणा सभाजिताः। संस्कृतभारत्याः कार्यस्य परिचयः, पुस्तकप्रदर्शनम्, शलाकापरीक्षोत्तीर्णस्य **सार्थकघोरपडे**छात्रस्य सभाजनम्, इत्यादयः कार्यक्रमाः सञ्जाताः। अवसरेऽस्मिन् कालिदाससंस्कृतविद्यापीठस्य कुलगुरुः **डॉ. उमावैद्य**, संस्कृतभारत्याः सङ्घटनमन्त्री **श्रीश देवपुजारी**, पल्लेवारपरिवारजनाः, पत्रकाराः नागरिकाश्च समुपस्थिताः आसन्। संस्कृतभाषायाः विकासार्थं निवेदनं फडणवीसवर्याय समर्पितम्।

■ **पठाणकोटे आतङ्कप्रहारः** २ जानेवारी दिनाङ्के वायुयानपत्तनसमीपे सञ्जातः। पञ्च दुष्प्रवेष्टारः आतङ्किनः हताः।

■ **वामपन्थी नेता भाई बर्धनः**, नवत्यधिकवर्षदेशीयः, नागपुरनिवासे २ जानेवारीदिनाङ्के नवदिल्यां निधनं गतः।

तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।
ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥

सम्पादकीयम्

सुसंस्कृता पत्रकारिता

जनतन्त्रशासनस्य चतुर्थः स्तम्भः भवति खलु वृत्तमाध्यमानि इति पत्रकारितायाः महत्त्वं सम्प्रति बालैरपि सुष्ठु ज्ञायते। वृत्तमाध्यमानां वैविध्येन प्राचुर्येण च निखिलं विश्वं स्पृष्टं व्याप्तं च। अनिच्छन्नपि जनः वृत्तं श्रोतुं, द्रष्टुं च बाध्यत एव। गृहे स्थित्वा एव अशेषजगतः सूचनाः प्राप्तुं शक्यन्ते। विचारमन्थनैः, चर्चासत्रैश्च कस्याश्चिदपि घटनायाः हेतु-प्रयोजन-परिणामाः ज्ञायन्ते। अथ च अनुकूल-प्रतिकूलात्मकैः मत-मतान्तरैः सम्भ्रमिताः जनाः कथंकथमपि निरुपायाः भूत्वा किमपि मतम् अवलम्बन्ते। एवं च व्यापकत्वात् अपरं ब्रह्म इव भाति एतद् वृत्तमाध्यमम्।

का नाम पत्रकारिता? पत्रकारितेति पत्रकारस्य कर्म। कस्तर्हि पत्रकारः? इति पृच्छ्यते चेत् स एव पत्रकारः यः देशेषु विदेशेषु समाजे अनुभूतानां वैशिष्ट्यपूर्णानां धार्मिक-सामाजिक-आर्थिक-सांस्कृतिक-राजनीतिक-शैक्षणिक-स्वास्थ्यादिविषयकघटनानाम् अनुभवानां वा यथार्थसङ्कलनं कृत्वा विश्लेषित-विवरणेन सह, संबद्धजनानां साक्षात्कारं कृत्वा, यथाशीघ्रं ध्वनि-लेख-छायाङ्कनादिभिः, शैलीविशेषैः सह दृक्-श्राव्य-मुद्रितमाध्यमद्वारा आत्मनिष्ठभावनया प्रसारणं करोति।

भारतस्य राष्ट्रपित्रा महात्म-गान्धिना सुष्ठु उक्तम्, ''पत्रकारितायाः एकमात्रमुद्दिष्टं सेवाधर्मो भवितुमर्हति। जनतन्त्रशासने वृत्तपत्रं शक्तिशालि साधनम्। परं यथा अनिर्बन्धः जलप्रवाहः ग्रामान् नाशयति, तथैव अनियन्त्रिता पत्रकारिता नाशिनी स्यात्। तादृशं नियन्त्रणम् आन्तरिकं भवेत् न तु बलात्'' इति। टॉम स्टॉप्सार्ड महोदयेन भणितम् यद् 'यदि भवान् विश्वं परिवर्तयितुमिच्छति तर्हि पत्रकारिता एव सुलभं साधनं खलु' इति। इतिहासस्य पूर्वलेखनमेव पत्रकारिता इति जिऑफ्री वार्डमहोदयस्य कथनम्। एवं च अन्यैरपि नैकैः समाजशास्त्रज्ञैः, पत्रकारैः समाजधुरीणैश्च पत्रकारितायाः महत्त्वं प्रतिपादितम्। एभिः सूक्तिभिः पत्रकारितायाः आधुनिककाले स्थानं महत्त्वं च अधोरेखितं भवति। महति पदे दायित्वमपि महत् विद्यते। परं, संशयमापतति मनः। अपि दायित्वनिर्वहणं चारुतरं क्रियते सम्प्रति वृत्तमाध्यमेन (पत्रकारितया)?

दुःखेन भण्यते नेति। पत्रकारितायाः प्रथमः पाठः वर्तते अधुना यद् कुक्कुरस्य मानवदंशः प्राकृतिकः परं मानवस्य कुक्कुरदंशः वार्ताविषयो भवति। यद्यद् विचित्रम्, अचिन्तितम्, अप्राकृतिकं, उद्वेगकरं वृत्तम् अथवा गुर्वाकारं, बृहदाकारं च यशः तद् तदेव वार्तासु प्राधान्यं भजते, नान्यद् इति प्रथम-पाठस्य विस्तारः। तेन वार्ताः कदाचित् खण्डिताः, कदाचित् भ्रष्टाः, कदाचित् दूषिताः, कदाचित् च विकृताः अपि दृश्यन्ते। एवं च क्रमेण पुनः अद्यतनीये वृत्तमाध्यमे प्रवृत्तिद्वयं वर्धितं दृश्यते। एकं तु 'वृत्तांशपरमाणोः पर्वतीकरणम् अथ च पर्वतप्रायवृत्तस्य परमाणूकरणं' (मिडिया हाईप्)। अपरश्च धनलोभेन विशिष्टरीत्या वृत्तस्य प्रस्तुतिः (पेड् न्यूज्) इति। विविधैः प्रकारैः एतत् प्रवृत्तिद्वयं दृश्यते। प्रकाराणां वर्णनं तु अत्र अप्रस्तुतम् अतः न दीयते। अन्यदपि एकः दोषः वर्धमानः दृश्यते - असभ्यशब्दानां प्रयोगः। एवम् एभिः सर्वैः दोषैः पत्रकारितायाः मूल्यानां ह्रासो भवति। नूनं भ्रष्टशब्दानां वार्तानां भवति विनिपातः शतमुखः। अपि च, यथा कूलङ्कषा नदी तटे स्थितान् वृक्षान् उन्मूलयति तथैव एषा दूषिता पत्रकारिता वाचकान् स्वमतप्रवाहे पातयति। क्व महात्म-गान्धिना अपेक्षिता आन्तरिक-नियन्त्रणयुता पत्रकारिता क्व चाधुनिकी परस्परं स्पर्धमाना अधोधो गच्छन्ती पत्रकारिता। बहुशः अर्थलोभः अर्थार्जनमतिशेते।

सुसंस्कृता पत्रकारिता

अध्यापनं, क्षात्रं, वैद्यकमिव पत्रकारितापि उदात्त-व्यवसायः (Noble Occupation) इति गण्यते। शिक्षकाः देशस्य भाविनागरिकान् संवर्धयन्ति। सैनिकाः बाह्यशत्रुभिः अन्तर्गतशत्रुभिश्च राष्ट्रं रक्षन्ति। वैद्याः राष्ट्रस्य स्वास्थ्यचिन्तां वहन्ति। पत्रकाराः नागरिकान् वर्तमानसमस्याविषये अवहितान् कुर्वन्ति। भावि-सङ्कटान् व्यञ्जयन्ति। उन्नतेः दिग्दर्शनं कुर्वन्ति। अतः पत्रकारितायाः पावित्र्यं यत्नतः रक्षणीयमेव।

पत्रकारितायाः रूपपरिवर्तनंकालोऽयं सम्प्राप्तः। यदि पुनश्चैकवारं भारतीयेन मनसा सुसंस्कृतेन, राष्ट्रप्रेमप्रोतेन, विज्ञाने, कर्मणि च रतेन भाव्यम् इति अपेक्ष्यते तर्हि पत्रकाराणां तत्र महद् योगदानमावश्यकम्। वार्ताः विधायकपद्धत्या प्रकाशनीयाः। गुणानां मण्डनं, दोषानां त्यागः, सभ्यशब्दानां प्रयोगः आदिभिः प्रकारैः समाजभूषणानां गुणकीर्तनं, नीतिमूल्यानां पुनःसंस्थापनम् इत्येव मम कर्तव्यम् इति दृढं मनसि धर्तव्यम् पत्रकारेण। तात्पर्यं, यद् कार्यं लोकमान्य-तिलकादिभिः पारतन्त्र्यकाले वृत्तमाध्यमेन कृतं तदेव अद्यापि आवश्यकम्। वृत्तमाध्यमानि परिवर्तनसामर्थ्यं दधति, तैः स्वकर्तव्यं जागरितव्यम् इत्येव कालोचितम्। इति शम्।

● डॉ. वीणा गानु

महाराष्ट्र शासन

वारसा बाळशास्त्री जांभेकरांचा, अभिव्यक्ती स्वातंत्र्याचा

आचार्य बाळशास्त्री जांभेकर(१८१२-१८४६)

संस्मरण दर्पणकाराचे

पत्रकारांच्या कल्याणासाठी :

- विकास पत्रकारितेला चालना देण्यासाठी आचार्य बाळशास्त्री जांभेकर यांच्यासह विविध महापुरुषांच्या नावे दरवर्षी विविध पुरस्कार देऊन पत्रकारांचा सन्मान.
- पत्रकारितेत महत्त्वपूर्ण योगदान देणाऱ्या ज्येष्ठ पत्रकार, संपादकांचा लोकमान्य टिळक जीवनगौरव पुरस्काराने गौरव.
- राज्यातील सुमारे अडीच हजार पत्रकारांना अधिस्वीकृती-पत्रिका प्रदान
- अधिस्वीकृतीधारक पत्रकारांना गंभीर आजार, अपघात झाल्यास किंवा अकस्मात निधन झाल्यास त्यांच्या कुटुंबियांना मदत करण्यासाठी राज्य शासनाच्या शंकरराव चव्हाण सुवर्णमहोत्सवी पत्रकार कल्याण निधीची स्थापना
- अधिस्वीकृतीपत्रिकाधारक पत्रकारांना राज्य मार्ग परिवहन महामंडळाच्या बसमध्ये तसेच रेल्वेमध्ये प्रवासासाठी सवलत.
- अधिस्वीकृतीपत्रिकाधारक पत्रकारांना शासकीय रुग्णालयांमध्ये मोफत औषधोपचार.

दर्पणकार आचार्य बाळशास्त्री जांभेकर यांच्या स्मृतीस विनम्र अभिवादन...

दर्पणदिनाच्या हार्दिक शुभेच्छा !

देवेंद्र फडणवीस
मुख्यमंत्री

माहिती व जनसंपर्क महासंचालनालय, महाराष्ट्र शासन

''संस्कृत-भवितव्यम्'' इति साप्ताहिक-संस्कृतपत्रिकाया: सहसम्पादिकाया: डॉ. वीणा-गानु-महाभागाया: प्रश्नान् उत्तरति - डॉ. बलदेवानन्द-सागर: ... !

१) कदाप्रभृति भवान् संस्कृतसंबद्ध:?

उत्तरम् - बाल्यकालादेव। कुटुम्ब-संस्कारा:, अपि च प्राक्तन-जन्म-संस्कारा: अत्र संयोजका: इत्यपि वक्तुं शक्यते।

२) भवत: संस्कृतशिक्षणं कथम् अभवत्? पारम्परिकरीत्या उत आधुनिकपद्धत्या?

उत्तरम् - कुलगुरूणां स्वाामिनां त्यागमूर्तिरूपाणां श्रीशिवोऽहं - सागरचरणानाम् अनुग्रहेण कृतोपनयन-संस्कार: तै: संस्कृताध्ययनार्थं काशीं प्रति प्रेषित:। तत्र श्रीदक्षिणामूर्ति-संस्कृत-महाविद्यालये स्थित्वा पारम्परिकरीत्या डॉ. सम्पूर्णानन्द-संस्कृतविश्वविद्यालयात् शास्त्रि-परीक्षा उत्तीर्णा, अनन्तरं दिल्ली-विश्वविद्यालयात् स्नातकोत्तर-परीक्षा, एम्.फिल्.-परीक्षा च उत्तीर्णे। नवदेहल्या: श्री. ला. ब. शा. रा. संस्कृतविश्वविद्यालयात् पी.एच्.डी. (विद्यावारिधि:) उपाधि: अधिगत:। आरम्भे गुजरातराज्ये भावनगरजनपदे चमारडीग्रामे गृहीतजन्मा पंचमीकक्षां यावत् जन्मग्रामे, सप्तमीं कक्षां यावच्च वल्लभीपुरे आधुनिक-रीत्या शिक्षाम् अवाप्नोत्।

३) पत्रकारिताक्षेत्रे को भवत: गुरुपदम् अधितिष्ठति?

उत्तरम् - परमार्थेन आकाशवाणी अनन्तरं च, दूरदर्शनम्। काश्याम् अध्ययनावसरे 'गाण्डीवम्', 'गीताधर्म'-प्रभृतिपत्रिकासु कविता:, कथा:, विविधा: लेखा: च लिखित्वा प्रकाशिता:। 'वेदान्तपरिभाषा', 'द्वादशोपनिषद:', 'शिवमहिम्न: स्तोत्रम्' चेति पुस्तकानि सम्पादितानि, परञ्च, आकाशवाण्या: संस्कृत-वार्ताप्रसारणं हि, यदाप्रभृति (३० जून १९७४ त:) जीवनं जीवनवृत्ति: च संजाते. शनै: शनै: संस्कृत-पत्रकारिता-विषयिणी रुचि: प्रवर्धिता। साम्प्रतं 'व्यास' इति दृश्यवाहिनीत: (TV)-त: संस्कृत-पत्रकारिता-विषयकाणि सप्तव्याख्यानानि प्रसारितानि सन्ति, तानि ''यूट्यूब'' इत्यत्र द्रष्टुं शक्यते। संस्कृत-पत्रकारिताविषयकं पुस्तकं संस्कृत-भाषायां विरचितम्, तच्च प्रथमं ''शारदा''-यां प्रकाशितम्, अनन्तरं ''संस्कृत-भारत्या'' प्राकाश्य-मानीतम्। विश्वपुस्तक-मेलावसरे (२०१०) बंगलूरुनगरे प्राक्तनेन निर्वाचनायुक्तेन एन्.गोपालस्वामिवर्येण लोकाय अर्पितं च।

४) प्रसारमाध्यमेषु संस्कृतस्य कीदृश: प्रभाव:?

उत्तरम् - नातिचिरं (१०-११ दिसम्बर २०१५) दिल्ल्यां सम्पन्नायां पंचम्यां संस्कृतपत्रकार-संगोष्ठ्यां समुप-स्थापितै: शोधपत्रै: पी.पी.टी. प्रदर्शनै: च सर्वै: प्रतिनिधिभि: सहभागिभि: च दृष्टं श्रुतं च यत् सामाजिक-संचारमाध्यमेषु दिनानुदिनं संस्कृतस्य प्रयोग: विवर्धत एव।

५) संस्कृते प्रसारमाध्यमानां कीदृश: प्रभाव:?

उत्तरम् - सुष्ठु जिज्ञासितम्। सामाजिक-संचारमाध्यमेषु दिनानुदिनं संस्कृतस्य प्रयोग: विवर्धते इति कृत्वा संस्कृतानुरागिण: संस्कृताभिमानिन: च प्रसार-माध्यमेभ्य: साहाय्यम् आददति। उपकृता: भवन्ति। सूचना-प्रविधि-क्रान्तिकारणात् संस्कृतं साम्प्रतम् अधिकतरं साम्प्रतं संजातम्। प्रसारमाध्यमानां कारणात् संस्कृते इतोऽपि अधिकतर: प्रभाव: भविष्यति काले दरीद्रक्ष्यते।

६) प्रथमतया यदा भवान् दिल्लीत: वार्ता: श्रावितवान् तद्विषये किञ्चित् वदतु।

उत्तरम् - अद्भुतोऽयम् अनुभव:। ईश्वरकृपया पित्रो: आशिराशिभि: गुरो: अनुग्रहेण च अवसरोऽयं लब्ध: आसीत्। एतदपि अनुभूतं यत् आकाशवाणी-माध्यमेन बलदेवानन्द-नामायं वराक: संस्कृत-सेवक: च, अशेषजगति ख्यातिम् अवाप्स्यति अत: संस्कृतेति परमदेवता समधिकावधानेन सततं समाराधनीया इत्यनारतम् अनुभूयते स्म।

७) 'प्रवाचक: बलदेवानन्दसागर:'-इति चिरपरिचितानि अक्षराणि खलु। एतादृशे प्रदीर्घे कालखण्डे स्यात् कश्चित् अविस्मरणीय: प्रसंग: येन अस्मादृशानां चित्तानि अपि आनन्दम् अनुभवेयु:। कृपया विवृणोतु भवान्।

उत्तरम् - कालक्रमेण एतानि त्रयोदशाक्षराणि मम अभिज्ञान-रूपाणि जातानि। तेषु दिनेषु दृश्यवाहिनीनाम् एतादृशं बाहुल्यं नासीत् इति कृत्वा जना: आधिक्येन श्राव्य-प्रसारणानि शृण्वन्ति स्म। बाढम्। विगत-एकचत्वारिंशद्-वर्षाणि यावत् आकाशवाणी-दूरदर्शनयो: कार्यानुष्ठानस्य अवधौ घटिता: तादृशा: अनेके अविस्मरणीया: प्रसङ्गा: वर्तन्ते। तेषु अन्यतमं वर्णयामि। भारतस्य राष्ट्रपतिं महामहिमशालिनं डॉ. शङ्कर-दयाल-शर्माणं मेलितुम् एकं संस्कृताभिमानिनां प्रतिनिधि-मण्डलं राष्ट्रपति-भवनं प्रयातमासीत्। राष्ट्रपतिना साकं व्यक्तिश: परिचयावसरे अन्यतमेन संस्कृत-विदुषा डॉ.

गौतमभाई-पटेलेन यदा प्रोक्तं यत् एष अस्ति - बलदेवानन्द..., झटिति एव राष्ट्रपतिमहोदयः न्यगादीत् यत् ''इयम् आकाशवाणी, सम्प्रति वार्ताः श्रूयन्ताम्, प्रवाचकः - बलदेवानन्द-सागरः।''

... एवं हि भारतस्य प्रथम-नागरिकस्य मुखारविन्दात् इमानि वचांसि श्रुत्वा आत्मनः धन्यताम् अन्वभवम्।

८) ''श्री-अप्पाशास्त्रि-राशिवडेकरः'' इत्यस्य विषये भवान् किं वदिष्यति?

उत्तरम् - एते अस्माकं प्रेरणास्पदीभूताः। संस्कृत-पत्रकारिताक्षेत्रे श्री-अप्पाशास्त्रि-राशिवडेकरमहोदयानां योगदानम् अप्रतिमं वर्तते। एतेषां स्मृतौ अयमेव समुचितः श्रद्धाञ्जलिः भविता यत् वयं सर्वे संस्कृतानुरागिणः संभूय संस्कृतपत्रकारिता-कार्याणि आचरेम।

९) वृत्तांकने स्वातन्त्र्यम्/परिवर्तनस्य आवश्यकता/शुद्धता-विचारः च इत्येतस्मिन् विषये भवतः विचारधारां ज्ञातुम् उत्सुकाः वयम्।

उत्तरम् - पत्रकारिता नाम लोकतन्त्रस्य सुदृढः चतुर्थः स्तम्भः। अतः वृत्ताङ्कने स्वातन्त्र्यं नूनं स्यात्। वयं जानीमः यत् समाजे सर्वदा समुचितं रचनात्मकं वा नैव घटते अतः वृत्त-परिवर्तनं तु नैव, परं च वृत्तपरिष्कारः (आधिक्येन रचनात्मकवृत्त-प्रकाशनम्) भवेत् इति मे मतिः। एतदर्थं युव-पत्रकाराः प्रशिक्षणीयाः सन्ति। संस्कृत-पत्रकारिताक्षेत्रे भाषायाः शुद्धताविचारः परमावश्यकः। केचन समुत्साहिनः संस्कृत-पत्रं पत्रिकां वा आरभन्ते परंच तत्र शब्दानुशासनं नैवानुसरन्ति चेत् भाविप्रजानां कृते नैतत् हितावहं सेत्स्यति।

१०) श्राव्यमाध्यमं दृक्माध्यमं च इत्येतयोः विषये किञ्चित् स्पष्टीकरोतु भवान्!

उत्तरम् - एतत् माध्यम-द्वयमपि प्रभावि वर्तते। श्राव्यमाध्यमे केवलं श्रवणेन्द्रियं सक्रियं भवति। दृङ्माध्यमे दृक्-श्रवणेति-इन्द्रियद्वयं कार्यरतं भवति, अत एव कश्चन सुदीर्घकालं यावत् दृश्यमाध्यमम् अवलोकयति चेत्, क्लान्तः भवति। श्राव्यमाध्यमेन एतादृशी क्लान्तिः नैवानुभूयते। अपि च, दृक्माध्यमेन सर्वाणि वस्तूनि वार्णिकानि जीवन्तीव प्रतीयन्ते अतः एतत् समधिकम् आकर्षकम् इति तु निश्चप्रचम्। परन्तु अत्र प्रविधि-(टेक्नोलोजी)-वैभिन्न्यं वर्तते। श्राव्यमाध्यमं सापेक्षतया सरलं, दृक्माध्यमं च किन्चित् जटिलं वर्तते।

११) अग्रिमजीवने भवतः के के संस्कृतविषयकाः संकल्पाः? योजनाः वा?

उत्तरम् - वर्षत्रय-पूर्वम्, महाकालनगर्याम् उज्जयिन्यां कालिदास-अकादम्याः निदेशक-दायित्वस्य निर्वहणावसरे मया काश्चन संस्कृत-योजनाः प्रारूपिताः आसन्, तासां योजनानां प्रारूप-प्रस्तावाः मध्यप्रदेश-शासनस्य संस्कृति-मन्त्रिणे संस्कृति-सचिवाय च प्रदत्ताः सन्ति। तेषु प्रस्तावेषु संस्कृत-एफ्-एम्-रेडियो-प्रवर्तनम् वा संस्कृत-कम्यूनिटी-रेडियो-प्रवर्तनम् अन्यतमं वर्तते। युगपदेव संस्कृत-पत्रकारिता-सम्बद्धानि कानिचित् कार्याणि अभिलक्ष्य संस्कृतानुरागिणां यूनां प्रशिक्षणात्मकाः संकल्पाः अवशिष्यन्ते।

१२) भवन्मतेन संस्कृतस्य भवितव्यं कीदृशम्? किं च अस्मादृशानां दायित्वम्?

उत्तरम् - संस्कृतस्य भवितव्यं रचनात्मकम् उज्ज्वलं च परिभावयामि। पूर्वं नैतादृशः सौविध्यान्वितः परिवेशः आसीत्। उदाहरणार्थम् अत्र ''प्राचीप्रज्ञा''-इति मासिकीं ई-संस्कृतपत्रिकां, ''सम्प्रतिवार्ताः'' इति दैनिकम् ई-संस्कृत-वार्तापत्रं च उद्धरामि। कदाचित् राजस्थानविश्वविद्यालयस्य संस्कृतविभागेन आयोजिते पुनश्चर्या-कार्यक्रमे समवेतान् प्राध्यापक-व्याख्यातॄन् सम्बोधयन् अहम् उक्तवान् यत् साम्प्रतिके काले ई-संस्कृतपत्रिका-इति वैद्युताणविक-पत्रिकाप्रकाशनं नास्ति कठिनमिति...। यः कश्चन संस्कृत-पत्रकारः एतद्विषयिणीम् अनुज्ञाम् आदाय ई-संस्कृतपत्रिकाम् आरब्धुं शक्नोति। एतानि वचांसि आधृत्य ''प्राचीप्रज्ञा''-इति मासिकी ई-संस्कृतपत्रिका आरब्धास्ति।

साम्प्रतम् अस्मादृशानाम् इदमेव दायित्वं यत् स्व-स्व-क्षेत्रेषु संस्कृत-कार्याणि कुर्वन्तः अपि राष्ट्रियस्तरे सम्भूय सामाजिक-सञ्चारमाध्यमेषु संस्कृतप्रयोगार्थं प्रयतेम। एतदर्थं ''भारतीय-संस्कृत-पत्रकार-सङ्घः'' पूर्वतः एव कार्यनिरतः अस्ति।

१३) संस्कृतं स्वीकृत्य ये प्रसारमाध्यमेषु पदं कुर्वन्ति वा कर्तुम् उत्सुकाः तेषां कृते कः भवतः सन्देशः?

उत्तरम् - तेषां सर्वेषां स्वागतं ये नाम संस्कृतं स्वीकृत्य प्रसारमाध्यमेषु पदं कुर्वन्ति वा कर्तुम् उत्सुकाः सन्ति। साम्प्रतम् अनेकविधानि सन्ति प्रसारमाध्यमानि। एतदर्थं तैः संस्कृतभाषायाः प्रावीण्यपुरस्सरं संचारमाध्यमानां प्रशिक्षणमपि अनुष्ठेयम्, अपि च, अनुवादकला अभ्यसनीयास्ति।

१४) प्रसारमाध्यमानि अर्थार्जनमाध्यमानि भवितुम् अर्हन्ति वा?

उत्तरम् - नूनं प्रसारमाध्यमानि अर्थार्जनमाध्यमानि भवितुम् अर्हन्ति। संस्कृतज्ञाः साम्प्रतम् एतदर्थं सन्नद्धाः भवेयुः। यद्यपि संस्कृत-सेवाव्रतिनः धनार्जनं जीवन-लक्ष्यत्वेन नैव स्वीकुर्वन्ति, तथापि सारल्येन आजीविका-निर्वहणं स्यात् इत्येतदर्थम्, अपि च, व्यवहारकार्याणि तु अर्थेन एव सिद्ध्यन्ति इतिकृत्वा साम्प्रतं संस्कृतस्य कार्यैः प्रसार-माध्यमेषु नूनम् अर्थोपार्जनं शक्यमस्ति - इति शम्....!

१५) वृत्त-माध्यमेषु विपुला असंस्कृता यथा अवास्तविक-वृत्तांकन-प्रवृत्तिः (मिडीया-हाईप्), अथ च, धनादान-लोभेन विपरीत-वृत्ता-प्रसारण-प्रवृत्तिः (पेड-न्यूज) च

--- *अग्रे अष्टमे पृष्ठे*

स्वामिविवेकानन्द जयन्त्यवसरे

स्वामि-विवेकानन्देन अनुभूताः काश्चित् घटनाः



परिभ्रमणावसरे स्वामि-विवेकानन्देन बहवः घटना अनुभूताः। तासु विशेष-घटनाद्वयम् -

१) हिमालयपरिसरे भ्रमन्तं विवेकानन्दं दैवयोगेन कश्चित् तपस्वी साधुर्मिलितवान्। तस्य सात्त्विकीं वृत्तिम् सद्-व्यवहारश्चावेक्ष्य स कोऽपि महात्मा (साक्षात्कारी) लक्ष्यते इति विवेकानन्दस्य मतमभवत्। स्वामिना सह संवदता तेन साधुना स्वजीवने ईदृशमामूलाग्रम् परिवर्तनङ्कथमभवदिति स्वीयकथा स्वामिनं श्राविता। स उवाच -

''आदौ चौर्यकर्म कुर्वन्नासमहम्। अथैकदा चौर्यार्थं सहसा पवहारिबाबाकुटजे प्राविशमहम्। तत्रस्थानि कानिचित् वस्तून्यपि उद्धृतानि। तावतैव स पवहारी महात्मा निद्रां त्यक्त्वा जागृतोऽभवत्। तदा सर्वाण्यपि वस्तूनि तत्रैव उज्झित्वा पलायनम् कर्तुमुद्यतोऽहम्। परं स्वयं पवहारिमहात्मा सर्वाणि वस्तूनि शीघ्रम् चित्वा मे पृष्ठतो धावन् धावन् मामुपगतवान्। 'भवान् स्वीकरोत्वेतानि वस्तूनि' इत्युक्त्वा मह्यं प्रायच्छत् निरगच्छच्च।

तदा तस्य महात्मनो निःस्पृहत्वं मया अनुभूतम्। तेन अनुभवाञ्जनेन नेत्रे मे उन्मीलिते। तदाप्रभृति चौर्यं त्यक्त्वा तपस्यामार्गो मया चितः। तपःसाधनया सम्यक् परिवर्तितं रूपम् भवत्पुरतोऽद्य विद्यते।'' इति।

अनुभवेनानेन स्वामिना मनसि चिन्तितम् -

''दुष्प्रवृत्तेर्जनस्य चेतसि सत्प्रवृत्तेरपि बीजं कुत्रचित् निहितम् भवत्येव। निमित्तमात्रेण तत् जागरणीयं भवति।''

२) अथैकदा स्वामी वृन्दावनं प्रापत्। यमुनाया विशालतीरे भ्रमतः स्वामिनः श्रुतौ श्रीकृष्णस्य मुरलेर्मधुरध्वनिर्गुञ्जन् भासते स्म। श्रीकृष्णस्य भक्तियुते वातावरणे स्वामिनो चित्तम् अरमत। तत्पूर्वं श्रीरामकृष्णपरमहंसस्तथा श्रीसारदादेवी वृन्दावने कतिपयदिनानि न्यवसताम्। विवेकानन्दस्वामिना कानिचित् दिनानि तत्र निवासः कृतः। श्रीकृष्णस्य परमभक्तेन तेन वृन्दावनं परितः सर्वत्र भ्रमणं कृतम्। तत्रस्थ-गोवर्धनगिरेः परिक्रमणं कृतवता स्वामिना - 'कुतोऽपि भिक्षा न याचनीया, अयाचित-वृत्तिनैव परिभ्रमणीयम्' इति मनसि सङ्कल्पितम्। यदि केनचित् स्वयं दीयते तदैव अन्नं ग्रहणीयम् इति। व्रतं त्विदम् अतिकठिनमासीत्। 'बुभुक्षितोऽस्मि' इति केवलं कथनमपि याच्ञाप्रकारो भवेत्। यदि किमपि न वदिष्यामि तर्हि 'बुभुक्षा मां बाधते' इति कोऽपि न जानीयात्। यद् भवेद् तद् भवेद् इति निर्धारेण गोवर्धनगिरिपरिक्रमणं तु आरब्धम्। ... प्रथमे दिने एव क्षुधा उदरं पीड्यते स्म। पर्जन्योऽपि वर्षति स्म। छत्रमपि नासीत् संरक्षणार्थम्। भृशं श्रान्तो विवेकानन्दः मूर्च्छितोऽभवत्। तथापि पर्यटने न विरामः। ...

तत्रान्तरे केनचिदाहूतः स्वामी तम् अनवेक्ष्य अग्रे चलन्नासीत्। उत वेगेन चलन्नासीत्। 'भवते भोजनमानीतम्। स्वीकरोतु।' इत्याकर्ण्यापि स्वामी पुनश्च वेगेन धावन्नासीत्। परं श्रान्तः सः कियत्कालं वेगेन धावितुं शक्ष्यति? पृष्ठतो गच्छन् स मनुष्यः तेनैव वेगेन धावन् धावन् स्वामिनमुपगतः। 'भोजनं स्वीकरोतु' इत्युक्तवान्। किमपि अवदता स्वामिना तदन्नं गृहीतम्। स मनुष्यः तस्मिन् वनपरिसरे सहसैव अदृश्योऽभवत्। घटनया च तया स्वामी मनसि किमपि विमृष्टवान्। विमर्शेन च तेन स्वामिनो हृदयं - श्रीकृष्णभक्तिना प्रपूरितम्। परमेश्वरो भक्तस्य भक्तिं परीक्षते एवेति तेन ज्ञातम्। साक्षात् भगवता श्रीकृष्णेन मह्यम् अन्नं प्रेषितम्। तत्क्षणमेव भगवद्गीतोक्तस्य चतुर्थाध्यायस्य स्मरणं स्वामिनेऽभवत्।

यो भक्तोऽनन्यभावेन ईश्वरं भजते भगवान् तस्य भक्तस्य चिन्तां स्वयं वहति। ... भगवद्वचनस्य साक्षादनुभवोऽयम् इति स्वामि-विवेकानन्देन मनसि कृतम्।

● डॉ. विजया रामचन्द्र जोशी

विज्ञानं ब्रह्म

बुद्धिमतां विश्वमिदमाधुनिकम्, मतिमतां युगमधुनातमम्
विश्वेऽपि प्रकृत्यामासीन्नाम 'अन्तःकरणम्' - आदिमम्
चत्वरस्थाने विनिहितम्, किमप्येकं रसायनमेवायुषः
यस्य विकाराः विकृतयश्च पदार्थ-सत्यम् इदं नाम च

अद्यतनीयं विश्वं प्रकृत्या एव विश्वं प्राकृतिकम्
यस्यं तृतीयत्त्वं नामजीवितं यदाधुनिकत्वम्
तथाऽप्याधुनिके, कारण-विहीने विद्यमानाः वयम्
अ-कारणमेव अकारणे कारणेऽपि च नाम व्यवस्थिताः वयम्

वयमेव विधातारः वयमेव धातारः, कल्पनानां शतानाम्
वयमेव कर्तारः - आधुनिक-मानवाः यैः रसायनशास्त्रेण
कापिल-सांख्यमपि नवीकृतम् असंख्याताश्च ये शताः
शताधिकाष्टानि मूलद्रव्याणि तत्रापि विनिर्मितमस्माभिर्नाम

ज्ञानं विज्ञानमयं यस्याऽपि, वयमेव विधातारः
भारतीयास्तथैव पाश्चिम-शास्त्रज्ञाः ये केऽपि स्युश्च
शास्त्रज्ञाः तेऽपि सर्वे वयमद्य, वयमेव भारतीयाः
येषां बुद्धिमतामस्ति विश्वमिदं समुन्मीलितम्,

यन्नामाधुनिकं विज्ञानं ब्रह्म

● डॉ. प्रकाश पाण्डे

परम्परा !

येन भूर्जपत्रेण पुरा दीर्घकालपर्यन्तमस्माकं संस्कृत-साहित्यं स्वाङ्के धारयित्वा संरक्षितं, तस्य वंशरूपा भूर्जवृक्षजातिः प्रायः इदानीं मरणोन्मुखा। नाति कालान्तरेण एतस्याः वृक्षजातेः अवशेषोऽपि भूपृष्ठे दुर्लभः भविष्यति इति वार्ता। अनेन तरुपत्रेण यः अक्षयः अजरामरश्च वेद-वेदाङ्ग-शास्त्र-कथा-नाटक-काव्यादीनां निधिः संरक्षितः संवर्धितश्च, स एव प्रायः अधुना लिखित-मुद्रित-टङ्कितादिरूपैः विद्यते। ध्वनिमुद्रिकायां चित्र-पट्टिकायां च एषः श्रेष्ठः ज्ञाननिधिः अंशतः उल्लिखितः स्यात्। सङ्गणक-सदृशाणां यन्त्राणां गणस्मरणिकायामपि (Computer Memory) सः बिन्दुरूपेण तिष्ठति। अक्षरनिधेः एषा अक्षुण्णा परम्परा अत्र पद्यरूपेण प्रस्तुता -

वृद्धः जर्जरः भूर्जवृक्षः सङ्गणकं प्रति वदति -

वेदवेदाङ्गशास्त्राणि पुराणानि पुरा मया।
कथा-नाटक-काव्यानि स्वपत्रे पालितानि च॥१॥
वाल्मीकिव्यासभासानां कालिदासस्य भारवेः।
साहित्यै रञ्जितं पृष्ठं भवभूतेश्च दण्डिनः॥२॥
वैशेषिकं कणादस्य न्यायो गौतमदर्शनम्।
कपिलस्य ततः सांख्यं योगशास्त्रं पतञ्जलेः॥३॥
मीमांसा जैमिनेश्चापि द्वैताद्वैतपरम्परा।
इत्येवं शास्त्रपूतं तत् पृष्ठं मे स्यात्पुरातनम्॥४॥
आरोहन्ति यथा शाखां मयूरा हंसकोकिलाः।
तरोस्तथैव मे पत्रं कवयो लेखका बुधाः॥५॥
पर्णचर्मप्रस्तराणि ताम्रलोहादिधातवः।
ईदृशाणि पुरा लेखसाधनान्यभवन् किल॥६॥
परमेतेषु पत्राणि तरूणामुत्तमानि तु।
श्रेष्ठं तत्राऽपि मे भूर्जपृष्ठं लेखाय राजते॥७॥
अद्य कालान्तरेण स्यात् साहित्यामृतधारकः।
वृद्धोऽहं मरणासन्नस्तस्मै कालाय वन्दनम्॥८॥
कृत्वा मे निहितं कार्यं वेदवेदाङ्गरक्षणम्।
वृद्धोऽपि कृतकृत्योऽहं दृष्ट्वाऽक्षुण्णां परम्पराम्॥९॥
कर्गजो नवयन्त्रस्थो गणस्मरणिका तथा।
धारयन्त्यद्य साहित्यं सा चित्रध्वनिमुद्रिका॥१०॥
साहित्याक्षरमालायास्तेन स्मरणदर्शने।
भवतात् सर्वलोकानां ज्ञानविज्ञानहेतवे॥११॥
जीर्णानि पर्णानि यथा विहाय।
सृजन्ति वृक्षा नवपल्लवाँस्ते।
तथा नवीनानि सुसाधनानि
रक्षन्तु साहित्यमखण्डमेतत्॥१२॥

● डॉ. चन्द्रगुप्त श्री. वर्णेकरः

महोदयाः !

''प्राची प्रज्ञा'' (ISSN No. 2348 – 8417) इति अन्ताराष्ट्रियान्तर्जालपत्रिकायां **''शास्त्रमञ्जूषा''** इति षाण्मासिकखण्डस्य द्वितीयाङ्कनिमित्तां प्रकाशनाय मौलिकाः शोधलेखा आविश्वं विद्यमानेभ्यो विद्वद्भ्य आमन्त्र्यन्ते। लेखाः अधिकाधिकं १५ पृष्ठात्मकाः टङ्कयित्वा prachi prajnaenb@gmail-com इति संकेतेन मृदुप्रतिकृतिरूपेण ३० अप्रेल २०१६ पर्यन्तं मुख्यसम्पादकं प्रति प्रेषयितुं शक्यन्ते।

शोधलेखाः संस्कृतभाषया/English/हिन्दीभाषया वा Unicode आधारितदेवनागरीलिप्या/रोमनलिप्या वा १२/१४ अक्षरमानेन १४ पृष्ठे १.५ पङ्क्ति-अन्तरालेन न्यायसङ्गत-पार्श्वसीमसहिताः टङ्किताः स्युः।

Microsoft Word आधारितं सञ्चिकाप्रारूपं स्यात्।

प्रतिपृष्ठम् (आद्यं विहाय) पृष्ठशीर्षे लेखस्य शीर्षकमवश्यं टङ्कितं स्यात्।

पादटिप्पणी ग्रन्थकार-ग्रन्थ-प्रकाशक-वर्ष-पृष्ठ-संख्या-क्रमेण सज्जिता स्यात्।

शोधलेखस्य संक्षिप्तिकाऽपि प्रायः २०० शब्दैः प्रेषणीया।

शोधलेखस्य अन्ते लेखकस्य नाम, वृत्तिः, संकेतः, दूरभाषसंख्या, अन्तर्जालसंकेतश्चेत्यादिकमवश्यं लेखनीयम्।

विशेषज्ञमण्डल्या परीक्षणोपरान्तं प्रकाशनयोग्याः शोध-लेखाः प्रकाशयिष्यन्ते। प्रकाशनयोग्यतायाः मानदण्डाः निम्नवत् निर्धारिताः सन्ति -

प्रकाशनात्परं शोधलेखस्य सर्वाधिकारः ''प्राची प्रज्ञा'' इत्यस्याः एव सुरक्षितः भविष्यति। शोधलेखस्य पुनः प्रकाशनस्य स्थितौ ''प्राची प्रज्ञा'' इत्यस्याः लिखितानुमतिः अवश्यं स्वीकर्तव्या।

शोधलेखस्य प्रकाशनयोग्यताऽयोग्यतानिर्धारणदायित्वं ''प्राची प्रज्ञा'' इत्यस्यामेव न्यस्तं भविष्यति।

निवेदकः
मुख्यसम्पादकः
''प्राची प्रज्ञा'' https://sites-google-com/site/praachiprajnaa

---

भवितव्यम्—साप्ताहिकस्य डिसेंबर—मासस्य ३८, ३९ क्रमाङ्कयोः संयुक्ताङ्के प्रकाशितस्य देवी—अहल्या—स्मारक—समितेः विषयकस्य लेखिकायाः नाम **सौ. श्रुतिकीर्ति विनय सप्रे** इति वर्तते। अनवधानेन तस्याः पूर्वाश्रमस्य उपनाम मुद्रितमस्ति, क्षम्यताम्! — **सम्पादकमण्डलम्**

पञ्चम पृष्ठतः अग्रे --- **डॉ. बलदेवानन्द-सागरः ... !**

दरीदृश्यते। अपि भारतीय-संस्कृत-पत्रकार-संङ्घः अस्मिन् प्रकरणे तां प्रवृत्तिं विरोद्धुं कमपि समुपायं विधास्यति ?

उत्तरम् - वृत्त-माध्यमेषु विपुला असंस्कृता च अवास्तविक-वृत्तांकन-प्रवृत्तिः पत्रकारितायाः व्यवसायित्व-कारणात् प्रवर्धते। सर्वेऽपि प्रबुद्धाः नागरिकाः जानन्ति यत् पत्रकारितायाः लक्ष्यत्रयं विनिर्धारितमस्ति पत्रकारिता-विशेषज्ञैः समाज-शास्त्रिभिश्च। तदस्ति -

अ) मुद्रण-प्रकाशन-प्रसारण-माध्यमेन नागरिकाणां कृते राष्ट्रिय-अन्ताराष्ट्रिय-घटना-क्रमस्य संसूचनम्,

ब) एतन्माध्यमेन नागरिकानां मनोरञ्जनम्,

स) अपि च, एतल्लक्ष्य-द्वयेन सहैव नागरिकेषु विभिन्न-सामाजिक-नीति-विषयकं जागरणम्। एतेषां लक्ष्याणां परिपूर्त्यर्थं पत्रकारितया परिनिष्ठित-प्रयास-निरतया नूनं भाव्यम्। परञ्च, वास्तविक-दृश्यम् अन्यदेव वर्तते। पत्रकारितायाः इतिवृत्त-अध्ययनेन एतत् स्पष्टं जायते, परं यथा समाज-गतिः भवति, जनाः शनैः शनैः समेषामपि संसाधनानामुपयोगं स्वार्थ-पूर्त्यर्थम् आधिक्येन कुर्वन्ति। साम्प्रतं पेड्-न्यूज्-इति धनादान-पूर्वकं वृत्त-प्रसारणं प्रवर्धते, एतन्नियन्तुं पूर्वन्तु प्रशासनेन एव विधिः विनिर्मेयोऽस्ति। भारतीय-संस्कृत-पत्रकार-सङ्घः नूनं प्रवृत्तिमेनाम् अवरोद्धुं विरोद्धुञ्च बद्ध-परिकरः। संस्कृत-पत्र-पत्रिकासु एतादृशी प्रवृत्तिः नैव स्यादिति अस्माभिः परिभावनीयमस्ति।

१६) ऐषमः संस्कृत-पत्रकारितायाः सार्ध-शताब्दो भवति। अपि तमुपलक्ष्य भारतीय-संस्कृत-पत्रकार-सङ्घः विशेषोपक्रमान् आयोजयिष्यति ? के के च ते सन्ति ?

उत्तरम् - दिल्ल्यां विगते दिसम्बर-मासे १०-११-दिनाङ्कयोः (१०-११-दिसम्बर २०१५) सम्पन्नायां सङ्गोष्ठ्याम् एतत् प्रस्तावितं यत् संस्कृत-पत्रकारितायाः सार्ध-शती-पूर्त्यवसरे (१-जून २०१६) अन्ताराष्ट्रियं संस्कृत-पत्रकार-सम्मेलनं स्यादिति। साम्प्रतम् एतद्-विषयिणी प्रक्रिया प्रवर्तते। अस्य सम्मेलनस्य आयोजनार्थं प्रस्ताव-त्रयं सम्प्राप्तम्। ऐषमः जान्युआरि-मासान्ते वा फेब्रुआरि-मासे वा सङ्घस्य कार्यकारिण्याः उपवेशनावसरे एतद्-विषये किमपि परमार्थेन निर्णेष्यते इति सम्भावयामि। अपि च, अत्र मया एतदपि संयोजनीयं यत् वर्षेऽस्मिन् जूनमासे ''जयन्ती'' इति प्रथम-संस्कृत-दैनिक-वार्त्ता-पत्रस्य वर्षशती-पूर्तिः अपि वर्तते। एतदर्थमपि केचन कार्यक्रमाः राष्ट्रिय-स्तरे समायोजनीयाः इति सङ्घेन प्रस्तावितम्।

⁂ ⁂ ⁂

वार्ताः

■ **मराठीकविः पाडगांवकरः दिवङ्गतः -** महाराष्ट्रभूषणः, पद्मविभूषणः इत्यादिभिः पुरस्कारैः सभाजितः सुप्रसिद्धः षडशीतिवर्षदेशीयः, मानवजीवनप्रेमी, साहित्यकारः श्रीमङ्गेश-पाडगावकरः मुम्बय्यां २ जानेवारी दिनाङ्के स्मृतिशेषमभूत्।

■ **शिवशक्ति-महासङ्गमः -** राष्ट्रिय-स्वयंसेवक सङ्घस्य पश्चिम-महाराष्ट्रप्रदेशस्य अष्ट-जनपदानाम् अयं महासम्मेलनं रविवासरे ३ जानेवारीदिनाङ्के पुणेमहानगरसमीपे म्हारुंजी-ग्रामे सुसम्पन्नम्। लक्षमिताः गणवेषधारिणः स्वयंसेवकाः सप्ततिसहस्राश्च नागरिकाः सहभागिनः अभवन्। सङ्घेशक्तिः युगे युगे इत्येवम् उपादिशत् परमपूजनीयः **सरसङ्घचालकः डॉ. मोहनभागवतः।**





संस्कृत-भाषा-प्रचारिण्याः सभायाः इदं साप्ताहिकं राष्ट्रीयसंस्कृतसंस्थान, नई दिल्ली द्वारा प्रदत्तेन आंशिकार्थ सहाय्येन डॉ. चन्द्रगुप्त वर्णेकरः इत्यनेन सभायाः सचिवेन कृष्णचंद्र एजन्सीज, नागपुरम् इत्यत्र मुद्रापयित्वा संस्कृत-भवने २, पश्चिम-उच्च-न्यायालय-मार्ग, नागपुरे प्रकाशतां नीतम्।